# A

## 22728 — 120 MINUTES

1. ऋतं पिबन्तौ – इत्यत्र ऋतशब्दस्य अर्थः कः?
   A) सत्यम्  B) क्रिया  C) कर्मफलम्  D) अन्य एव

2. चक्षुषा घटप्रत्यक्षे कः संनिकर्षः ?
   A) संयोगः  B) संयुक्तसमवायः  C) समवायः  D) समवेतसमवायः

3. व्याप्तिः नाम का?
   A) विशेषप्राप्तिः  B) सर्वत्र व्यापनम्
   C) कदाचित् सहयोगः  D) साहचर्यनियमः

4. संज्ञासंज्ञिसंबन्धज्ञानं किम्?
   A) प्रत्यक्षम्  B) अनुमितिः  C) उपमितिः  D) शाब्दम्

5. न्यायमते पदशक्तिः कीदृशी?
   A) अस्मत्संकेतः  B) ईश्वरसंकेतः
   C) बोधकत्वमेव  D) अतिरिक्तः पदार्थः

6. व्याप्यारोपेण व्यापकारोपः कः?
   A) अनुमानम्  B) तर्कः  C) विपर्ययः  D) अन्यदेव

7. पादबद्धः छन्दोमयः वेदः कः?
   A) ऋग्वेदः  B) यजुर्वेदः  C) सामवेदः  D) त्रयोऽपि

8. अनुभवजन्यः स्मृतिहेतुः कः ?
   A) प्रत्यभिज्ञा  B) भावना  C) स्मरणम्  D) वेगः

9. दण्डिनः प्रसिद्धं काव्यं किम्?
   A) शिशुपालवधम्  B) नैषधम्
   C) दशकुमारचरितम्  D) न किमपि

10. किं वाक्यं समीचीनं न भवति?
    A) हेत्वाभासाः पञ्च  B) अवयववाक्यानि पञ्च
    C) भूतद्रव्याणि पञ्च  D) वायुभेदाः पञ्च

11. जिज्ञासा इत्यत्र ज्ञाधातोः उपरि कः प्रत्ययः?

A) टाप् प्रत्ययः B) सन् प्रत्ययः

C) अ प्रत्ययः D) सु प्रत्ययः

12. समवायः कतिविधः?

A) एक एव B) द्विविधः C) त्रिविधः D) अनन्तः

13. सुवर्णं कस्य द्रव्यस्य विषयः भवति?

A) पृथिव्याः B) अपाम् C) तेजसः D) न कस्यचित्

14. रूपरहितस्पर्शवान् कः?

A) पृथिवी B) जलम् C) तेजः D) वायुः

15. आद्यपतनासमवायिकारणं किम्?

A) फलम् B) वृक्षः C) वायुः D) गुरुत्वम्

16. करणं नाम किम्?

A) कारणमेव B) साधारणकारणम्

C) असाधारणकारणम् D) अन्यदेव किञ्चित्

17. वर्णस्वरूपोच्चारणादिपरं वेदाङ्गं किम्?

A) शिक्षा B) व्याकरणम् C) छन्दः D) निरुक्तम्

18. पार्वतीपरिणयः कस्मिन् काव्ये वर्णितः?

A) रघुवंशे B) कुमारसंभवे C) माघकाव्ये D) नैषधकाव्ये

19. सूत्रे प्रतिपादितं शास्त्रयोनित्वम् कस्य ?

A) आत्मनः B) ब्रह्मणः C) प्रपञ्चस्य D) वेदस्य

20. ब्रह्म जगतः कीदृशं कारणं भवति?

A) उपादानकारणम् B) निमित्तकारणम् C) उभयकारणम् D) न उभयमपि

21. रज्जौ सर्पावभासस्य किं नाम?

A) अपवादः B) अध्यासः C) आरोपः D) न किमपि

22. कठवल्लीषु कं प्रति उपदेशः क्रियते?

A) श्वेतकेतुम्  B) उपकोसलम्  C) यमराजम्  D) नचिकेतसम्

23. पीतोदका जग्धतृणाः– के?

A) पक्षिणः  B) गावः  C) मनुष्याः  D) न केऽपि

24. द्वितीयः वरः यमेन दत्तः कः?

A) पितुः प्रसादः  B) ब्रह्मविद्या
C) लोकाद्यग्निविद्या  D) अन्य एव

25. रामायणस्य उत्तरकाण्डकथा केन कविना नाटकीकृता?

A) वाल्मीकिना  B) भवभूतिना  C) भासेन  D) कालिदासेन

26. वृत्तानि अक्षराणि च योजयत –

| | |
|---|---|
| a. मालिनी | 1. 15 |
| b. मन्दाक्रान्ता | 2. 17 |
| c. शार्दूलविक्रीडितम् | 3. 19 |
| d. स्रग्धरा | 4. 21 |

A) a-1, b-2, c-3, d-4  B) a-2, b-3, c-4, d-1
C) a-3, b-2, c-1, d-4  D) a-1, b-2, c-4, d-3

27. अर्थान्तरन्यासस्य उदाहरणं किम्?

A) संकुचन्ति सरोजाणि स्वैरिणीवदनानि च ।
B) शम्भुर्विश्वमवत्त्यद्य स्वीकृत्य समदृष्टिताम् ।
C) हनुमान् अब्धिमतरत् दुष्करं किं महात्मनाम् ।
D) शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।

28. संदेशकाव्येषु किं वृत्तम् उपयुज्यते?

A) मालिनी  B) वंशस्थम्  C) स्रग्धरा  D) मन्दाक्रान्ता

29. आर्यावृत्तस्य विशेषः कः?

A) मात्रावृत्तम्  B) वैदिकम्  C) सुदीर्घम्  D) न कोऽपि विशेषः

30. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री– किं वृत्तम्?

A) आर्या  B) स्रग्धरा
C) शार्दूलविक्रीडितम्  D) अन्यदेव

31. का भाषा IE भाषाकुटुम्बे न अन्तर्भवति?

A) संस्कृतम् B) Greek C) द्राविडभाषा D) English

32. दन्त्यवर्णाः (dentals) केन योगे मूर्धन्यः (cerebrals) भवन्ति?

A) लकारेण (l) B) सकारेण (s)

C) पकारेण (p) D) अन्येन केनचित्

33. कर्णेभिः इति प्रयोगः कुत्र साधुः?

A) लोके B) वेदे C) उभयत्र D) अन्यत्रैव

34. सिम्ह-हिंस इत्यत्र किं पदकार्यं प्रवर्तते?

A) Metathesis– वर्णविपर्ययः B) Syncope– अल्लोपः

C) Haplology– मध्यमलोपः D) Anaptyxis– स्वरभक्तिः

35. पीताम्बरः इत्यत्र कः समासः?

A) तत्पुरुषः B) कर्मधारयः C) बहुव्रीहिः D) द्वन्द्वः

36. पञ्चीकरणं नाम किम्?

A) पञ्चवायुसंयोगः B) पञ्चभूतसंमिश्रणम्

C) पञ्चग्रहाणां उच्चता D) अन्यदेव

37. कर्मण्येवाधिकारस्ते इत्युक्तेः कुत्र न अधिकारः?

A) निषिद्धकर्मणि B) काम्यकर्मणि C) कर्मफलेषु D) अकर्मणि

38. आत्मनेवात्मना तुष्टः कः इति गीतायाम् उच्यते?

A) योगशीलः B) मननरतः C) आत्मज्ञानी D) स्थितप्रज्ञः

39. अजो नित्यः शाश्वतोऽयं पुराणः – कः?

A) आत्मा B) ईश्वर: C) ज्ञानम् D) ब्रह्म

40. ब्रह्मण: जिज्ञासा इत्यत्र कस्मिन् अर्थे षष्ठी भवति?

A) कर्तरि B) कर्मणि C) शेषे D) अन्यस्मिन् अर्थे

41. सूत्रोक्तं ब्रह्मणः लक्षणं किम्?

A) जन्मादिकारणत्वम् B) सर्वज्ञत्वम्

C) सच्चिदानन्दरूपत्वम् D) निर्गुणत्वम्

42. सामान्यीकरणस्य उदाहरणम् पदं किम्?

A) पतिः  B) तैलम्  C) सिंहः  D) अन्यदेव

43. अकारस्य उच्चारणस्थानं किम्?

A) कण्ठः  B) तालु  C) मूर्धा  D) दन्ताः

44. क्षत्रस्य शब्दो भुवनेषु रूढः – कथम्?

A) क्षितिं ददाति इति  B) अक्षतं त्रायते इति

C) क्षतः त्रायते इति  D) क्षतात् त्रायते इति

45. विचारमूढः प्रतिभासि मे त्वम् इति कः उच्यते?

A) दिलीपः  B) वसिष्ठः  C) रघुः  D) सिंहः

46. नलदमयन्त्योः दूतत्वेन प्रेषितः कः?

A) मेघः  B) कोकिलः  C) हंसः  D) अन्य एव

47. शोकः श्लोकत्वम् आगतः – कस्य?

A) आदिकवेः  B) कालिदासस्य  C) भासस्य  D) अन्यस्य एव

48. कर्तृकरणयोः का विभक्तिः?

A) प्रथमा  B) द्वितीया  C) तृतीया  D) चतुर्थी

49. केरलीयज्योतिषविज्ञानस्य प्रथमप्रवर्तकः कः?

A) माधवन् नम्बूतिरि  B) नीलकण्ठसोमयाजी

C) सुधाकरः  D) अन्य एव

50. एषु कः साधुः प्रयोगः?

A) पुष्पाणि स्पृहयति  B) पुष्पैः स्पृहयति

C) पुष्पेभ्यः स्पृहयति  D) पुष्पाणां स्पृहयति

51. सौम्यः इत्यस्य ग्रहनाम्नः पर्यायनाम किम्?

A) सोमः  B) बुधः  C) गुरुः  D) शुक्रः

52. अहोरात्रविकल्पस्य किमिति व्यवहारः?

A) दिनम्  B) राशिः  C) होरा  D) पक्षः

53. भूचलनादिदिनानि कस्मिन् कर्मणि वर्ज्यानि?

A) विवाहे B) उपनयने C) विद्यारंभे D) सर्वकर्मसु

54. काव्यस्य आत्मा कः इति आनन्दवर्धनः कथयति?

A) वाच्यार्थः B) लक्ष्यार्थः C) ध्वनिः D) अलङ्कारः

55. सति लिङ्गान्तरे यत्र स्त्रीलिङ्गं प्रयुज्यते – किमर्थम् ?

A) स्त्रीलिङ्गबहुमानाय B) शोभातिशयनिष्पत्तये

C) दोषसूचनाय D) अनुरागपुष्ट्ये

56. पदपरार्धवक्रता इति का उच्यते?

A) प्रत्ययवक्रता B) वर्णविन्यासवक्रता

C) वाक्यवक्रता D) प्रबन्धवक्रता

57. रामोस्मि सर्वं सहे – अत्र कस्मिन् पदे वक्रता?

A) रामपदे B) अस्मि इति पदे C) सर्वपदे D) सहे इति पदे

58. सिंहः माणवकः इत्यत्र का लक्षणा?

A) शुद्धा B) गौणी C) लक्षितलक्षणा D) न कापि

59. काव्यं किंसंमितया उपदेशं करोति?

A) प्रभुसंमितया B) सुहृत्संमितया C) कान्तासंमितया D) पुत्रसंमितया

60. यत्र व्यङ्ग्यार्थः वाच्यार्थापेक्षया अप्रधानः तत् किंभूतं काव्यम्?

A) ध्वनिकाव्यम् B) गुणीभूतव्यङ्ग्यम्

C) चित्रकाव्यम् D) अन्यदेव

61. ज्ञानाकरणकं ज्ञानं किम्?

A) प्रत्यक्षम् B) अनुमितिः C) उपमितिः D) शाब्दम्

62. आकाशस्य अनुमाने किं लिङ्गम्?

A) वायुः B) शब्दः C) सूर्यः D) अन्य एव

63. जलीयम् इन्द्रियं किम्?

A) घ्राणम् B) चक्षुः C) त्वक् D) रसनम्

64. क्षित्यादिकं सकर्तृकम् इति कस्य अनुमानम्?

A) परमाणोः B) आत्मनः C) ईश्वरस्य D) न कस्यापि

65. परमपरं चेति द्विविधं प्रोक्तं– किम्?

A) परत्वापरत्वे B) ज्ञानम् C) गुणः D) सामान्यम्

66. अधोनिर्दिष्टेषु समीचीनं वाक्यं किम्?

A) कालः सर्वकारणम् B) कालः त्रिविधः

C) कालः द्रव्याणां गुणः D) कालः अणुः अनित्यः

67. अजशब्दात् कः स्त्रीप्रत्ययः?

A) टाप् B) ङीप् C) डाप् D) ङीष्

68. सिद्धे शब्दार्थसंबन्धे इति कस्मिन् भाष्ये निर्दिश्यते?

A) महाभाष्ये B) शंकरभाष्ये

C) न्यायभाष्ये D) मीमांसाशाबरभाष्ये

69. अथशब्दस्य सामान्यतः कः अर्थःभवेत्?

A) आनन्तर्यम् B) अधिकारः C) मङ्गलम् D) पूर्वोक्तः सर्वोऽपि

70. अनादिः सान्तः अभावः कः?

A) प्रागभावः B) प्रध्वंसाभावः C) अत्यन्ताभावः D) अन्योन्याभावः

71. अलौकिकप्रत्यक्षस्य उदाहरणम् ज्ञानं किम्?

A) भूतलं घटवत् B) सुरभि चन्दनम्

C) अयं परमाणुः D) अन्यदेव

72. सत्ताजातिः कुत्र वर्तते?

A) द्रव्ये B) गुणे C) कर्मणि D) त्रिष्वपि

73. सांख्यमते कर्तृत्वं कस्य उच्यते?

A) प्रकृतेः B) पुरुषस्य C) अन्यस्य D) न कस्यापि

74. नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्– का?

A) वासवदत्ता B) पद्मावती C) सुदक्षिणा D) शकुन्तला

75. शाकुन्तले अभिज्ञानं किम्?

A) अङ्गुलीयकम्  B) चूडामणिः  C) बालः भरतः  D) अन्य एव

76. जटायुवधाङ्कः कस्मिन् नाटके चित्रीकृतः?

A) उत्तररामचारिते  B) आश्चर्यचूडामणौ

C) स्वप्नवासवदत्ते  D) शाकुन्तले

77. कृष्णस्य समीपम् इत्यस्य समासे किं रूपम्?

A) अधिकृष्णम्  B) परिकृष्णम्  C) उपकृष्णम्  D) संकृष्णम्

78. पुनः रमते – संधिकरणे किं रूपं भवति?

A) पुनारमते  B) पुनर्रमते  C) पुनो रमते  D) पुनः रमते

79. प्रतिष्ठते इत्यत्र कः धातुः?

A) तिष्ठ धातुः  B) स्था धातुः  C) ष्ठ धातुः  D) अन्य एव

80. एतेषु कर्मसंज्ञासूत्रभागः कः

A) साधकतमम्  B) ध्रुवमपाये

C) स्वतन्त्रः  D) कर्तुः ईप्सिततमम्

81. टित आत्मनेपदानां टेः किं भवति?

A) अकारः  B) इकारः  C) उकारः  D) एकारः

82. अद्वैतवेदान्तमते जीवः कीदृशः?

A) ब्रह्मैव  B) ब्रह्मभिन्नः  C) ब्रह्मकार्यम्  D) ब्रह्मांशः

83. महावाक्येषु अन्यतमं न भवति किम्?

A) तत्त्वमसि  B) अयमात्मा ब्रह्म

C) एकमेवाद्वितीयम्  D) आनन्दो ब्रह्म

84. अज्ञानस्य अपरं नाम किम्?

A) कर्म  B) पापम्  C) अविद्या  D) मिथ्या

85. न हन्यते हन्यमाने शरीरे – कः उच्यते?

A) ब्रह्म  B) आत्मा  C) प्राणः  D) इन्द्रियम्

86. अशोच्यान् अन्वशोचस्त्वम् इत्यत्र त्वम् इति कः सूचित :?

A) युधिष्ठिरः B) अर्जुनः C) श्रीकृष्णः D) दुर्योधनः

87. अस्माकम् इति रूपं कस्यां विभक्तौ वचने च भवति?

A) षष्ठी -बहुवचने B) द्वितीया –एकवचने

C) प्रथमा-एकवचने D) अन्यत्रैव

88. दिक् इति रूपं कस्मात् शब्दात् निष्पन्नम्?

A) दिक् शब्दात् B) दिच् शब्दात् C) दिश् शब्दात् D) दिग् शब्दात्

89. सहशब्देन योगे का विभक्तिः भवेत्?

A) प्रथमा B) द्वितीया C) तृतीया D) चतुर्थी

90. योजयत –

a. करिष्यति 1. लृट्
b. अकरोत् 2. लोट्
c. कुरु 3. लङ्
d. चकार 4. लिट्

A) a-1, b-3, c-2, d-4 B) a-2, b-3, c-4, d-1

C) a-3, b-1, c-2, d-4 D) a-1, b-3, c-4, d-2

91. केषां रक्षार्थम् अध्येयं व्याकरणम्?

A) शब्दानाम् B) भाषाणाम् C) काव्यानाम् D) वेदानाम्

92. एतेषु उभयपदिधातुः कः ?

A) वदि धातुः B) नम् धातुः

C) कृञ् धातुः D) पूर्वोक्तः सर्वोऽपि

93. एतेषु वृद्धिसंज्ञः वर्णः कः ?

A) आकारः B) ऐकारः C) औकारः D) पूर्वोक्तः सर्वोऽपि

94. अनुबन्धचतुष्टये किं न अन्तर्भवति ?

A) विषयः B) प्रयोजनम् C) अधिकारी D) कर्ता

95. भर्तृस्नेहात् सा हि दग्धापि अदग्धा –का?

A) शकुन्तला B) वासवदत्ता C) सीतादेवी D) अन्यैव

96. अत एव प्रियंवदा इत्युक्ता का?

A) शकुन्तला B) शकुन्तलासखी

C) शकुन्तलामाता D) अन्यैव

97. आश्चर्यचूडामणिनाटकं कस्मात् प्रदेशात् आगतं कथ्यते?

A) प्राच्यपथात् B) प्रतीच्यपथात् C) दक्षिणापथात् D) उदीच्यपथात्

98. वराहमिहिरस्य ग्रन्थ: कः न भवति?

A) रत्नावली B) बृहज्जातकम्

C) बृहत्संहिता D) पञ्चसिद्धान्तिका

99. एचोऽयवायावः इति सूत्रेण ओकारस्य कः आदेशः?

A) अय् आदेशः B) अव् आदेशः C) आय् आदेशः D) आव् आदेशः

100. शक्तिभद्रस्य नाटके कस्मात् भागात् आरभ्य रामायणकथा वर्णिता?

A) श्रीरामजन्मनः B) श्रीरामविवाहात्

C) शूर्पणखासमागमात् D) सीतापहरणात्

101. षष्ठे मासि कर्तव्यं कर्म किम्?

A) जातकर्म B) नामकरणम् C) अन्नप्राशनम् D) अन्यदेव

102. षट्सु दोषेषु अन्यतमं न भवति

A) गुरुमौढ्यम् B) अम्हस्पतिः C) अधिमासः D) शुक्लपक्षः

103. वाक् + हरिः = किं रूपम् ?

A) वाग्हरिः B) वाच्हरिः C) वाक्धरिः D) वाग्धरिः

104. तां पद्मिनीं हिमहतामिव चिन्तयामि– का उच्यते?

A) शकुन्तला B) वासवदत्ता C) सीतादेवी D) अन्यैव

105. आश्चर्यचूडामणिना सह चित्रितम् अन्यत् आभरणं किम्?

A) अद्भुताङ्गुलीयकम् B) आश्चर्यरत्नहारः

C) अद्भुतवलयम् D) न किमपि

106. योजयत

a. वराहमिहिरः　　1. बृहज्जातकम्
b. ब्रह्मगुप्तः　　2. ब्रह्मस्फुटसिद्धान्तः
c. भास्करः　　3. लीलावती
d. कल्याणवर्मा　　4. सारावली

A) a-1, b-2, c-3, d-4　　B) a-2, b-3, c-4, d-1
C) a-2, b-1, c-3, d-4　　D) a-1, b-2, c-4, d-3

107. चरराशिः कः
A) मेषराशिः　B) ऋषभराशिः　C) मिथुनराशिः　D) न किमपि

108. अभेदारोपः कस्मिन् अलङ्कारे क्रियते?
A) उपमालङ्कारे　B) रूपकालङ्कारे　C) अनन्वये　D) अन्यत्रैव

109. त्वन्मुखश्रीकृते नूनं पद्मैः वैरायते शशी – अत्र कः अलङ्कारः?
A) उपमा　B) रूपकम्　C) दृष्टान्तः　D) उत्प्रेक्षा

110. मेषः कालपुरुषस्य उत्तमाङ्गम् – उत्तमाङ्गम् नाम किम्?
A) हृदयम्　B) गुह्यम्　C) मुखम्　D) शिरः

111. मुकुन्दमालास्तोत्रस्य कर्ता कः?
A) श्रीशङ्करः　B) श्रीनारायण:　C) उद्दण्डशास्त्री　D) कुलशेखरः

112. गृहप्रवेशे उत्तमराशिः कः?
A) चरराशिः　B) स्थिरराशिः　C) उभयराशिः　D) सर्वमपि

113. किं वाक्यं समीचीनं भवेत्?
A) उत्तरायणे मङ्गलकार्याणि प्रशस्तानि ।
B) दक्षिणायने मङ्गलकर्माणि प्रशस्तानि ।
C) अयनद्वयेऽपि मङ्गलकर्माणि प्रशस्तानि ।
D) दक्षिणायणे पितृकार्याणि न प्रशस्तानि ।

114. मीनराशिः कस्य स्वक्षेत्रं भवति?
A) शुक्रस्य　B) गुरोः　C) भौमस्य　D) अन्यस्य

115. एकैकस्य राशेः कियान् नक्षत्रभागः अंशः ?

A) नक्षत्रद्वयम्  B) सार्धनक्षत्रद्वयम्  C) सपादनक्षत्रद्वयम्  D) नक्षत्रत्रयम्

116. सीमन्तकर्म कदा अनुष्ठेयम् भवति?

A) विवाहकाले  B) प्रथमगर्भे  C) द्वितीयादिगर्भे  D) पुत्रजन्मनि

117. मनुष्यालयचंद्रिका इति ग्रन्थः कस्यां विद्यायां प्रसिद्धः?

A) आगमविद्यायाम्  B) ज्योतिषे

C) आयुर्वेदे  D) वास्तुविद्यायाम्

118. संदेशकाव्येषु एषु कः केरलीयः?

A) मेघदूतम्  B) हंससंदेशः  C) कोकिलसंदेशः  D) न कोऽपि

119. अष्टाङ्गहृदयम् इति ग्रन्थस्य विषयः कः?

A) योगः  B) चिकित्सा  C) गणितम्  D) संगीतम्

120. परमाणुसिद्धान्तः कस्मिन् तन्त्रे आदौ प्रकटितः?

A) वेदान्ते  B) आयुर्वेदे  C) वैशेषिके  D) अन्यत्रैव

---